# O. P. JINDAL SCHOOL, SAVITRI NAGAR

**Periodic Test- I** ( Round – II ) **(2026– 2027)**

**Class: X** **M M: 20**

**Subject: Sanskrit** **Time: 1. Hr.**

Name: _ _____ Class / Section: _____ Roll No.: _____

*General Instructions:- All questions are compulsory*

**प्र0 1 अधोलिखितम् नाट्यांशम् पठित्वा तद् आधारितानाम् प्रश्नानाम् उत्तराणि लिखत–**

(निम्नलिखित नाट्यांश को ध्यान से पढ़कर निर्देशानुसार प्रश्नों के उत्तर दीजिए)

**राजहंसः** – अये ! किन्नु खलु सरस्तीरे विहरति मयि केनापि कर्कशैः 'का–का' शब्दैः वातावरणम् आकुलीक्रियते ?

**राजहंसी** – भर्तः! काकात् अन्यः को भवितुमर्हति ? अस्य वर्णः अपि कृष्णः, कर्म अपि कृष्णम्। मेध्यम् अमेध्यं सर्वमेव भक्षयति। कर्णकटुशब्दैः.....।

**काकः** – (प्रविश्य, सक्रोधम्) आः किम् उक्तवती भवती ? यदि अहं कृष्णवर्णः तर्हि श्रीरामस्य वर्णः कीदृशः ? श्रीवासुदेवस्य वर्णः कीदृशः ? मृग्धे! अहं तु अतीव कर्तव्यपरायणः। प्रभाते 'का–का' ध्वनिना सुप्तान् प्रबोधयामि कर्मसु च विनियोजयामि।

I **एकपदेन उत्तरत**–(केवलं प्रश्नद्वयम्) **(½x2=1)**

i प्रभाते काकः कान् प्रबोधयाति ?

ii राजहंसः कुत्र विहरति स्म ?

iii प्रभाते कः सुप्तान् प्रबोधयाति ?

II **पूर्णवाक्येन उत्तरत**– (केवलं प्रश्नद्वयम्) **(1x2=2)**

i काकः स्व–वर्णस्य तुलना केन सह करोति ?

ii वातावरणं केन आकुलीक्रियते ?

iii प्रभाते कः सुप्तान् प्रबोधयाति कर्मसु च विनियोजयति ?

III **उचितम् उत्तरम् चित्वा लिखत**– (केवलं प्रश्नद्वयम्) **(1x2=2)**

i 'भक्षयति' इति क्रियापदस्य कर्तृपदम् किम् अस्ति ?

ii 'अस्य वर्णः अपि कृष्णः' अस्मिन् वाक्ये विशेषणपदं किम् अस्ति ?

iii 'अहं तु अतीव कर्तव्यपरायण' अत्र 'अहम्' इति सर्वनाम पदं कस्मै प्रयुक्तम् ?

**प्र0 2 अधोलिखितेषु वाक्येषु स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत–** **(1x4=4)**

(निम्नलिखित वाक्यों में स्थूलपदों के आधार पर प्रश्ननिर्माण कीजिए)– (केवलं प्रश्नचतुष्टयम्)

i **नेपथ्ये** काकध्वनिः श्रूयते।

ii मयूरस्य नृत्यं **प्रकृतेः** आराधना।

iii बकः मीनान् छलेन अधिगृह्य **क्रूरतया** भक्षयति।

iv **काकानाम्** ऐक्यं जगत्प्रसिद्धम्।

v अहमेव सर्वेषाम् पक्षिणाम् **माता**।

प्र0 3 अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा प्रदत्त विकल्पेभ्यः चित्वा लिखत। (½x10=5)

(निम्नलिखित वाक्यों में रेखांकित पदों का विकल्पों में से समास या विग्रह कीजिए)

i विद्यासमं चक्षुः नास्ति।

(क) विद्येन सम (ख) विद्यायाः सम्
(ग) विद्यया समम् (घ) विद्यायै सम्

ii वृक्षस्य समीपम् एका नदी वहति।

(क) उपवृक्षम् (ख) उपवृक्षा
(ग) वृक्षात् दूरम् (घ) वृक्षेएव

iii क्रीडाक्षेत्रे रामकृष्णौ खेलतः।

(क) रामौ च कृष्णौ च (ख) रामः च कृष्णः च
(ग) रामाः च कृष्णाः च (घ) रामम् च कृष्णम् च

iv अकातरः परैः न परिभूयते।

(क) न अकातरः (ख) नाकातरः
(ग) न कातरः (घ) अनाकातरः

v विषादेन सहितम् यूथपतिः अवदत्।

(क) विषादेन सहितम् (ख) सहितविषादम्
(ग) सविषादम् (घ) सहविषादम्

vi नीरात् जायते इति ..... कथ्यते।

(क) नीरजा (ख) नीरजः
(ग) नीरजम् (घ) निरजः

vii हस्तौ च पादौ च तेषां समाहारः स्वच्छं करणीयम्।

(क) हस्तपादे (ख) हस्तपादौ
(ग) हस्तपादम् (घ) हस्तपादात्

viii अतः बकः एव वर्षाभिनन्दनं करोति।

(क) वर्षा अभिनन्दनम् (ख) वर्षायाः अभिनन्दनम्
(ग) वर्षे अभिनन्दनम् (घ) वर्षात् अभिनन्दनमः

ix तदर्थं मयूरः राष्ट्रस्य पक्षी कथ्यते।

(क) राष्ट्रपक्षी (ख) राष्ट्रापक्षी
(ग) राष्ट्रेपक्षी (घ) राष्ट्रैपक्षी

x काकः सक्रोधम् मंचे प्रविशति।

(क) क्रोधेन सह (ख) सहक्रोधम्
(ग) क्रोधेन सहितम् (घ) सः क्रोधम्

प्र0 4 रेखांकित पदानाम् प्रसङ्गानुसारं शुद्धम् अर्थं चित्वा लिखत– (½x6=3)

(निम्नलिखित वाक्यों में रेखांकितपदों के आधार पर उचित विकल्पों से उत्तर लिखिए)

i आपत्काले सरांसि त्यक्त्वा दूरं व्रजसि।

(क) वदसि (ख) भजसि

(ग) गच्छसि (घ) खेलसि

ii मेध्यम् अमेध्यम् सर्वमेव भक्षयति।

(क) मेधाविनम् (ख) अभक्षणीयम्

(ग) विशुद्धम् (घ) खादनीयम्

iii अनृतम् वदसि चेत् काकः दशेत्।

(क) सत्यम् (ख) असत्यम्

(ग) मधुरम् (घ) कटुः

iv काकस्य गात्रम् यदि कांचनस्य।

(क) शरीरम् (ख) मुखम्

(ग) अधरम् (घ) नृपम्

v मम केकारवं श्रुत्वा कोकिलः अपि लज्जते।

(क) उक्त्वा (ख) हृत्वा

(ग) गत्वा (घ) आकर्ण्य

vi किन्नु खलु सरः तीरे विहरति।

(क) शिरः (ख) जलाशयः

(ग) नगरम् (घ) सर्वत्रः

प्र0 5 अधोलिखित–प्रश्नान् यथानिर्देशम् उत्तरत :– (केवलं प्रश्नत्रयम्) (1x3=3)

(निम्नलिखित प्रश्नों का निर्देशानुसार उचित उत्तर लिखिए)

(क) 'अहम् एव करुणापरः पक्षीसम्राट् काकः।' अस्मिन् वाक्ये विशेषणपदं किम् ?

(ख) 'जनाः प्रियस्य आगमनसंकेतम् मत्वा हृष्यन्ति।' अस्मिन् वाक्ये कर्तृ पदं किम् ?

(ग) 'विचित्रा खलु दैवगतिः।' अस्मिन् वाक्ये विशेष्यपदं किम् ?

(घ) 'अलम् अलं मिथः कलहेन।' अत्र 'परस्परं' अस्मिन् अर्थे किं पदं प्रयुक्तम् ?

––000––